**अज्ञानसंवित्ति** ( ajñāna-saṁvitti ) *f.* cognition of ignorance अज्ञान्यस्मीति चाज्ञानसंवित्तिश्चादृशः कथम् IṣṭaSi. 194. 1.

**अज्ञानसंवृतत्व** ( ajñānasaṁvṛta-tva ) *n.* the state of being covered with ignorance प्रायेण घटपटस्त्रीपुरुषादिसंवृतिग्रहात् । अज्ञानसंवृतत्वात् इत्यपरे AbhidhKoBh. 392. 1 ( *on* 7. 2 )

**अज्ञानसंशय** ( ajñāna-saṁśaya ) *m.* doubt of ignorance ऐश्वर्यं दिव्यदेहश्च ज्ञानमज्ञानसंश( ? क्ष )यः । ··· क्रियादीनां फलं भवेत् S'ivaP. i. 18. 151 (24B. 12)

**अज्ञानसंसर्ग** ( ajñāna-saṁsarga ) *m.* association with nescience अज्ञानसंसर्गासंसर्गावेव बन्धमोक्षौ SiddhāLeSaṁ. 111. 8.

**अज्ञानसंस्कार** ( ajñāna-saṁskāra ) *m.* impression of nescience जीवन्मुक्तौ अज्ञानसंस्कारस्वीकारपक्षे व्यभिचारात् LaCandr. 155. 33.

**अज्ञानसंकट** ( ajñāna-saṅkaṭa ) *n.* critical situation in the form of ignorance एतस्मिन्मे मनो विद्धं खिद्यतेऽज्ञानसंकटे SkandP. i(2). 46. 51; i(2). 3. 66; BhāgP. iii. 7. 1; स्व एवालोक एतेन संप्राप्तोऽज्ञानसंकटे YogVā. v. 28. 17.

**अज्ञानसंकुल** ( ajñāna-saṅkula ) *adj.* full of ignorance विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम् । सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसंकुलम् UpadeSā. 346. 89.

**अज्ञानसंगति** ( ajñāna-saṅgati ) *f.* association with nescience अज्ञानसंगतिं मुक्त्वा न स्यात्तज्जेन संगतिः BṛĀraUBhVā. ii. 1. 308.

**अज्ञानसंगूहन** ( ajñāna-saṅgūhana ) *n.* act of concealing ignorance विक्षेपादि । तस्याज्ञानसंगूहनाद्यर्थत्वात् । तत्त्वनिर्णयोऽश्च तत्र अनार्थित्वात् NyāySu. (Ja.) 465B. 1 ( *on* iii. 2. 1 )

**अज्ञानसत्ता** ( ajñāna-sattā ) *f.* existence of nescience न खलु साक्ष्यवभासादन्या अज्ञानसत्ता तवास्ति NyāySu.(Ja.) 30A. 9 ( *on* i. 1. 1 )

**अज्ञानसत्त्व** ( ajñāna-sattva ) *n.* existence of nescience अज्ञानभेदस्वीकारेऽपि अज्ञानसत्त्वे अधिष्ठानप्रकाशानुपपत्तेः GuruCandr. i. 102. 11; चिदुपरागसत्त्वेऽपि रसादावज्ञानसत्त्वान्न प्रकाशः GuruCandr. ii. 141. 10; उक्तविषयतासंबन्धेन भाविन्यप्यज्ञानसत्त्वम् LaCandr. 42. 11; 485. 23; अज्ञानसत्त्वेन च न सुषुप्तिप्रलययोर्मुक्तिः LaCandr. 535. 25; 564. 26.

**अज्ञानसद्भाव** ( ajñāna-sadbhāva ) *m.* existence of nescience ( अज्ञाननाशस्य ) मिथ्यात्वेऽज्ञानसद्भावान्मायायानादिन्न मुच्यसे IṣṭaSi. 364. 3; 364. 17; ( अन्तःकरणसंसर्गभावाभावौ ) अज्ञानसद्भावाभावाभ्यां संभवत इति चेन्न Vādā. 148. 2.

**अज्ञानसंतति** ( ajñāna-santati ) *f.* continuity of ignorance असम्यग्दर्शनं त्यक्त्वा व्यर्थमज्ञानसंततिम् । सतैव्यं सम्यगेवेदम् YogVā. iv. 61. 11.

**अज्ञानसंतमस** ( ajñāna-santamasa ) *n.* thick darkness (in the form) of nescience असादवाप्य ··· अनुज्ञामज्ञानसंतमसबन्धविभेदभानोः HarVi. 12. 70; अज्ञानसंतमसमाश्रयणोन्मुखानां संवित्प्रदीपमहसा सहसा निरुन्धन् S'atDū. 105. 17.

**अज्ञानसमन्वय** ( ajñāna-samanvaya ) *m.* positive invariable concomitance with nescience यत्र वा अन्यदित्येवं भेदज्ञानमभाषत । सत्येव प्रत्यगज्ञाने तस्याज्ञानसमन्वयात् BṛĀraUBhVā. iv. 3. 1308; मोहतत्कार्यनीडो यस्तस्याज्ञानसमन्वयात् BṛĀraUBhVā. ii. 4. 434.

**अज्ञानसमविषयत्व** ( ajñānasamaviṣaya-tva ) *n.* the state of having the same object as that of ignorance ज्ञानस्याज्ञानसमविषयत्वेनैव तन्निवर्तकत्वम् AdvaiSi. 678. 3.

**अज्ञानसमष्टि** ( ajñāna-samaṣṭi ) *f.* aggregate or collective form of ignorance यत्तु ··· अज्ञानसमष्ट्यवच्छिन्नं चैतन्यमीश्वर इति वदन्ति SiddhāTa. 47. 4; 47. 5.

**अज्ञानसमानविषयक** (ajñānasamānaviṣaya-ka) *adj.* having the same object as that of nescience अधिष्ठानज्ञानत्वं हि अज्ञाननाशकज्ञानत्वं वा, अज्ञानसमानविषयकप्रमात्वं वा AdvaiSi. 529. 15; GuruCandr. i. 132. 19; ii. 169. 14; ii. 323. 23; अज्ञानसमानविषयकमनोवृत्त्युत्पत्तिक्षणे मनोवृत्त्यादिसत्त्वेऽपि न क्षतिः LaCandr. 155. 39.

**अज्ञानसमाश्रय** ( ajñāna-samāśraya ) *adj.* abode or resort of ignorance अज्ञानानि बहून्यसंख्यवपुषो जीवान् मुमुक्षूनपि ज्ञानाज्ञानसमाश्रयाननुयुगं तेषां च निःश्रेयसम् SaṁkṣeS'ā. 2. 133.

**अज्ञानसमुत्थत्व** ( ajñānasamuttha-tva ) *n.* the state of having arisen from ignorance कर्मज्ञानसमुत्थत्वान्नालं मोहापनुत्तये NaiṣkaSi. 23. 8.

**अज्ञानसमुदाय** ( ajñāna-samudāya ) *m.* aggregate of ignorance न चेहाप्यज्ञानसमुदाय एवावरणं एकेन च ज्ञानेनैकस्मिन्नज्ञाने निवृत्ते स नास्तीति प्रकाशोपपत्तिरिति वाच्यम् Nyāyāmṛ. 233B. 7.

**अज्ञानसमुद्रसेतु** ( ajñānasamudra-setu ) *m.* bridge across the ocean of ignorance हेमाद्रिरज्ञानसमुद्रसेतुं ब्रूते चतुर्थीव्रतम् CaturCin. ii(1). 501. 3.

**अज्ञानसंपन्न** ( ajñāna-sampanna ) *adv.* full of ignorance अयमज्ञानसंपन्नो वसिष्ठः कुरुते तपः BṛKathāK. 106. 80.

**अज्ञानसंबन्ध** ( ajñāna-sambandha ) *m.* association with nescience or ignorance ब्रह्मैव संसरति ब्रह्मैव मुच्यते, न तु जीवानां ज्ञानाज्ञानसंबन्धः PañcPra. 64. 1; 57. 4; 58. 2; 69. 4; किं नु खलु न करोति देहिनामयं मोहबन्धः, तस्य प्रसवभूमिरज्ञानसम्बन्धश्च YaśasCam. ii. 91. 5; आवरणं च तद्योग्यता अज्ञानसम्बन्धरूपा सुषुप्त्यादिसाधारणी आब्रह्मज्ञानमवतिष्ठते AdvaiSi. 587. 5; जीवस्यैवाज्ञोऽस्मीत्यज्ञानसम्बन्धानुभवः नेश्वरस्य SiddhāLeSaṁ. 68. 10; 140. 2; नापि पूर्वभ्रमकाले अज्ञानसम्बन्धस्याननुभवात् अभावेन भिन्नकालावच्छिन्नयोरवच्छेद्यावच्छेदकभावासंभवात् GuruCandr. i. 12. 23; ii. 97. 11; iii. 77. 11; वृत्त्यभावविशिष्टो योऽज्ञानसंबन्धः तदभाव एवाभिभवः LaCandr. 487. 31; 603. 43.

**अज्ञानसंबन्धिन्** ( ajñāna-sambandhin ) *adj.* associated with nescience or ignorance अज्ञब्रह्मजीववादे उपाधिसम्बन्धिब्रह्मजीववादे चाज्ञानसम्बन्ध्युपाधिसम्बन्धि ब्रह्मैवेति भोगव्यवस्था न सिध्यति VedāntDī. 130. 22 ( *on* ii. 3. 48 )

**अज्ञानसंभव** ( ajñāna-sambhava ) *m.* origin or rise of ignorance or nescience दोषदर्शनतश्चैव द्वापरेऽज्ञानसंभवः BrahmāṇḍP. i. 31. 21; मायां तु प्रकृतिं विद्यात् इत्यत्रापि नाज्ञानसंभव उच्यते NītiMā. 22. 7; *adj.* caused by ignorance ( पीड्यते जगत् ) तिलपीडैरिवाक्रम्य भोगैरज्ञानसंभवैः MahāBhā. xii. 204. 9; xii. 205. 18; कृतान्तेनाहमानीता व्यवस्यामेति कामिति । पृथङ्निरूपणं तत्र जनस्याज्ञानसंभवम् PadmP.(Ra.) 96. 10; ज्वरश्च जायते सद्यस्तद्वदज्ञानसंभवः BrahmP. 234. 11; योगिनो न हि दुःखं वा सुखं वाज्ञानसंभवम् AdhyāRā. iv. 8. 46; i. 7. 31; यस्य स्मरणमात्रेण ··· । अन्येऽपि बहवो मुक्ताः पापादज्ञानसंभवात् PadmP. iv. 88. 70; तर्कैः सारस्वतैः रत्नैश्चन्द्रिकाचन्द्रभूषणैः । दुरन्तध्वान्तभङ्गाय रूप्याद्यज्ञानसंभवम् GuruCandr. iii. 173. 16; BālamBha. ii. 24. 20 ( *on* 2. 20 )

**अज्ञानसंभावन** ( ajñāna-sambhāvana ) *n.* possibility of ignorance अभ्यस्तेऽपि हि नाम वस्तुनि चिरादज्ञानसंभावनम् SūktiMu. 89. 5.

**अज्ञानसंभूत** ( ajñāna-sambhūta ) *adj.* born of ignorance अज्ञानसंभूतं हृत्स्थम् ··· छित्त्वैनं संशयं योगमातिष्ठ MahāBhā. vi.26. 42 = BhagGī. 4. 42; अज्ञानसंभूतं अज्ञानात् अविवेकात् जातं ( संशयम् ) GītāBh.(S'aṅ.) 147. 16 ( *on* 4. 42 ); उत्पाद्याज्ञानसंभूतं संशयाख्यं विषद्रुमम् । शिवाद्वैतमहाकल्पवृक्षभूमिर्यथा भवेत् S'ivaP. vi. 16. 11 (491A. 16)

**अज्ञानसंभूति** ( ajñāna-sambhūti ) *f.* rise or birth of ignorance क्रोधादज्ञानसंभूतिर्विभ्रमस्तु ततः स्मृतेः GaṇeP. ii. 138. 60.

**अज्ञानसंभृतात्मन्** ( ajñānasambhṛtātman ) *adj.* whose mind is filled with ignorance केचित् ··· अज्ञानसंयुतात्मानः ( v. l. अज्ञानसंभृतात्मानः ) संचरन्ति KulārT. 1. 73.

**अज्ञानसंमोह** ( ajñāna-sammoha ) *m.* confusion or illusion caused by ignorance कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय MahāBhā. vi. 40. 72 = BhagGī. 18. 72; अज्ञानसंमोहः अज्ञाननिमित्तः संमोहः अविविक्तभावः अविवेकः GītāBh.(S'aṅ.) 567. 13 ( *on* 18. 72 ); योऽहमज्ञानसंमोहादज्ञया संप्रवृत्तवान् BrahmP. 243. 29.

**अज्ञानसर्प** ( ajñāna-sarpa ) *m.* snake in the form of ignorance अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना । किमु वेदैश्च शास्त्रैश्च किमु मन्त्रैः किमौषधैः ViveCū. 63.

**अज्ञानसलिलोर्मि** ( ajñānasalilormi ) *m.* wave of the flood of ignorance ककुपूकुलंकषैस्तैस्तैरज्ञानसलिलोर्मिभिः । ह्रियन्ते सर्वदा तेन केषां नाम न दृष्टयः PāṇḍaC. 17. 62.

**अज्ञानसहभाव** ( ajñāna-sahabhāva ) *m.* coexistence with nescience or ignorance न च ज्ञानमज्ञानस्यैव निवर्तकमिति न्यायेन विरोधः । अज्ञानसहभावनियतानामब्रह्मत्वादीनामज्ञानशब्देन पञ्चपादिकाचार्यैर्विवक्षितत्वात् JīvanVi. 45. 18.

**अज्ञानसहित** ( ajñāna-sahita ) *m.* accompanied by (i. e. full of) ignorance प्रमादादज्ञानसहितः ··· शठः । ··· कर्तासौ तामसो मतः GaṇeP. ii. 148. 20.

**अज्ञानसाक्षिता** ( ajñānasākṣi-tā ) *f.* the state of being a witness of nescience नाहमहं नाप्यर्थान्तरमपि तु अनुभूतिमात्रमज्ञानसाक्षितयावतिष्ठते Ātma-Si. 29. 19; न हि सुप्तोत्थितः अहमज्ञानसाक्षितयावतिष्ठ इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति BrahmSūBh.(Rā.) 49. 13 ( *on* i. 1. 1 )

**अज्ञानसाक्षित्व** ( ajñānasākṣi-tva ) *n.* the state of being a witness of nescience स्थितमज्ञानसाक्षित्वं नित्यानन्दत्वमात्मनः SarvaSiSaṁ. 12. 65; ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वम् ··· न संभवति VedāntDī. 90. 10 ( *on* ii. 1. 21 ) = VedāntTaSā. 74. 1; NītiMā. 23. 18; अहं न ज्ञातवानित्यत्र अज्ञानसाक्षित्वेन अहमर्थानुवृत्तिः स्वानुभवसिद्धा S'rutaPra. iA. 169. 15 ( *on* i. 1. 1 ); iA. 167. 25 ( *on* i. 1. 1 ); आसंसारमज्ञानसाक्षित्वेन ब्रह्मावतिष्ठते S'atDū. 128. 3; 81. 27.